# आर्यवेद : जैन वेद

– विजयशीलचन्द्रसूरि

जैन परंपरामां थयेला प्रथम तीर्थंकर ऋषभदेवनो उल्लेख ऋग्वेद आदि वेदोमां तथा पुराणोमां अनेक वार थयो छे, जे ऋषभदेवना अस्तित्व तथा प्राचीनतानुं प्रमाण छे. ऋषभदेवना प्रथम पुत्र हता भरत, जेमना नामने 'भारतवर्ष' साथे जोडवामां आवे छे. आ राजा भरते, पिता तीर्थंकर ऋषभदेवना मुखे शास्त्रोनां रहस्यो तथा उपदेशोनुं सम्यक् श्रवण करीने, संसारना व्यवहार धर्मना उचित परिपालनना हेतुथी, तीर्थंकरनी संमति मेळवीने 'माहन' एटले के अहिंसाव्रतधारी जैन श्रावकरूप ब्राह्मणोनी तेम ज चार वेदोनी योजना - रचना करी हती, तेवी जैन मान्यता अमुक ग्रंथोमां उपलब्ध थाय छे. १. संस्कारदर्शन, २. संस्थानपरामर्शन, ३. तत्त्वावबोध, ४. विद्याप्रबोध एम चार नामो धरावतां ए चार वेदो द्वारा ते जैन ब्राह्मणो पेढीओ सुधी जैन गृहस्थोने गृहस्थधर्मोचित संस्कार, आचार, बोध वगेरे शीखवता हता. आ जैन ब्राह्मणो ज्ञान-दर्शन-चारित्ररूप रत्नत्रयीना करण, करावण, अनुमोदनरूप त्रण त्रण प्रकारो, एटले के ए रूपे नव तांतणांवाळी जनोई-जिनोपवीत पण धारण करता हता. विक्रमना बारमा सैकामां आचार्य श्रीवर्धमानसूरिए रचेला जैन कर्मकाण्डना सर्वमान्य ग्रंथ "आचारदिनकर"मां मनुष्यना सोळ संस्कारोनुं विधान छे, तेमां जिनोपवीत-संस्कारनुं पण विधान उपलब्ध छे. आ १६ संस्कारो माटेना अनुष्ठानमां आर्य वेदना मंत्रो पण प्रयोजवामां आवता हता, तेमांना जे मंत्रो आ ग्रंथमां जोवा मळे छे ते मंत्रो अत्रे रजू करेल छे. जैन वेदमंत्रो विशे ग्रंथकारे आपेली विगतो आ प्रमाणे छे :

"इह यदुक्तं जैनवेदमन्त्रा इति तत् प्रतिपाद्यते । यदाऽऽदिदेवतनूज आदिमश्चक्री भरतो धृतावधिज्ञानः श्रीमद्युगादिजिनरहस्योपदेशप्राप्तसम्यक्श्रुतज्ञानः सांसारिकव्यवहारसंस्कारस्थितये अर्हन्निदेशमाप्य माहनान् धृतज्ञानदर्शन-चारित्र रत्नत्रयकरणकारणानुमतित्रिगुणत्रिसूत्रमुद्राङ्कितवक्षःस्थलान् पूज्यान् अकल्पयत् । तदा च निजवैक्रियलब्ध्या चतुर्मुखीभूय वेदचतुष्कमुच्चचार । तद् यथा –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्कारदर्शनं, संस्थानपरामर्शनं, तत्त्वावबोधः, विद्याप्रबोध इति चतुरो वेदान् सर्वनयवस्तुप्रकीर्तकान् माहनानपाठयत् । ततश्च ते माहनाः सप्ततीर्थंकरतीर्थं यावद् धृतसम्यक्त्वाः आर्हतानां व्यवहारोपदेशेन धर्मोपदेशादि वितेनुः । ततश्च तीर्थे व्यवच्छिन्ने तत्रान्तरे ते माहनाः प्राप्तप्रतिग्रहलोभाः तान् वेदान् हिंसाप्ररूपण साधुनिन्दनगर्भतया ऋग्यजुःसामाथर्वनामकल्पनया मिथ्यादृष्टितां निन्युः । ततश्च साधुभिर्व्यवहारपाठपराङ्मुखैस्तान् वेदान् विहाय जिनप्रणीत आगम एव प्रमाणतां नीतः । तेष्वपि ये माहनाः सम्यक्त्वं न तत्यजुः तेषां मुखेष्वद्यापि भरतप्रणीतवेदलेशः कर्मान्तरव्यवहारगतः श्रूयते । स चात्रोच्यते । यत उक्तमागमे-

सिरिभरहचक्कवट्टी आरियवेआण विस्सुओ कत्ता ।
माहणपढणत्थंमि णं(त्थमिणं) कहिअं सुअझाण (सुअनाण?) ववहारं ॥
जिणतित्थे वुच्छिन्ने मिच्छत्ते माहणेहिं ते ठविआ ।
अस्संजआण पूआ अप्पाणं कारिआ तेहिं ॥'' (आ.दि. पत्र ७/८)

उपरोक्त समग्र वर्णनथी एम प्रतिपादित थाय छे के आर्य वेदो विच्छेद पाम्या होवा छतां तेना कोई कोई अंशो, श्रीवर्धमानसूरिना समयमां एटले के बारमा शतकमां पण, केटलाक जैन ब्राह्मणो के गृहस्थो पासे मोजूद हता ज. केटलाक भोजक ज्ञातिना तथा अन्य जैन गृहस्थो, रत्नत्रयीना प्रतीक स्वरूप जिनोपवीत (जनोई) तो हजी दस-वीस वर्ष पहेलां सुधी पहेरता हता, ते तो आ लखनारे पण प्रत्यक्ष जोयुं छे. बल्के तेवा गृहस्थोना अवशेष आजे पण विद्यमान छे ज. आचारदिनकर जेवा ग्रंथमां आर्यवेदना थोडा अंशो मंत्ररूपे सचवाया छे, ते पण महत्त्वनुं तो छे ज. अलबत्त, आ समग्र मुद्दो ऐतिहासिक उलटतपास तो मागी ज ले छे. जैन गच्छोमां मध्यकालमां एक निगमगच्छ के निगम संप्रदाय हतो; तेना आश्रये रचायेला 'उपनिषत्' संज्ञावाळां निगमशास्त्रो आजे पण उपलब्ध छे. तेनुं अध्ययन थयुं के थतुं नथी. निषिद्ध तथा उपेक्षित मनाय छे. क्लिष्ट-अशुद्ध पण गणाय छे. तेनुं अध्ययन थाय तो आर्य वेदना मुद्दे कंईक प्रकाश सांपडे तो ते शक्य लागे छे.

(सन्दर्भ : आचारदिनकर (पोथी) प्रकाशक : पं. केसरिसिंह ओसवाल, मुंबई, ई. १९२२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आर्यवेदमन्त्रो यथा -** **( गर्भाधानमन्त्रः )**

ॐ अर्हं जीवोऽसि जीवतत्त्वमसि प्राण्यसि प्राणोऽसि, जन्म्यसि, जन्मवानसि, संसार्यसि, संसरन्नसि, कर्मवानसि, कर्मबद्धोऽसि, भवभ्रान्तोऽसि, भवसंबिभ्रमिषुरसि, पूर्णाङ्गोऽसि, पूर्णपिण्डोसि, जातोपाङ्गोऽसि, जायमानोपाङ्गोऽसि, स्थिरो भव, नन्दिमान् भव, वृद्धिमान् भव, पुष्टिमान् भव, ध्यातजिनो भव, ध्यातसम्यक्त्वो भव, तत्कुर्या न येन पुनर्जन्मजरामरणसंकुलं संसारवासं गर्भवासं प्राप्नोषि अर्हं ॐ ॥ (७-१)

**( पुंसवनसंस्कारमन्त्रः )**

ॐ अर्हं नमस्तीर्थङ्करनामकर्मप्रतिबन्धसंप्राप्तसुरासुरेन्द्रपूजायार्हते आत्मने त्वमात्मायुःकर्मबन्धप्राप्यं तं मनुष्यजन्मगर्भावासमवाप्तोऽसि, तद्भवजन्मजरामरणगर्भवासविच्छित्तये प्राप्तार्हद्धर्मोऽर्हद्भक्तः सम्यक्त्वनिश्चलः कुलभूषणः सुखेन तव जन्मास्तु । भवतु तव त्वन्मातापित्रोः कुलस्याभ्युदयः, ततः शान्तिः तुष्टिर्वृद्धिः ऋद्धिः कान्तिः सनातनी अर्हं ॐ ॥ (९-१)

**सूर्यवेदमन्त्रो यथा-** **( सूर्यदर्शनमन्त्रः )**

ॐ अर्हं सूर्योऽसि, दिनकरोऽसि, सहस्रकिरणोऽसि, विभावसुरसि, तमोऽपहोऽसि, प्रियङ्करोऽसि, शिवङ्करोऽसि, जगच्चक्षुरसि, सुरवेष्टितोऽसि, मुनिवेष्टितोऽसि, विततविमानोऽसि, तेजोमयोऽसि, अरुणसारथिरसि, मार्तण्डोऽसि, द्वादशात्माऽसि, चक्रबान्धवोऽसि, नमस्ते भगवन् प्रसीदास्य कुलस्य तुष्टिं पुष्टिं **प्रमोदं कुरु कुरु, सन्निहितो भव अर्हं ॐ ॥ (११-१)**

**चन्द्रस्य वेदमन्त्रो यथा-** **( चन्द्रदर्शनमन्त्रः )**

ॐ अर्हं चन्द्रोऽसि, निशाकरोऽसि, सुधाकरोऽसि, चन्द्रमा असि, ग्रहपतिरसि, नक्षत्रपतिरसि, कौमुदीपतिरसि, निशापतिरसि, मदनमित्रमसि, जगज्जीवनमसि, जैवातृकोऽसि, क्षीरसागरोद्भवोऽसि, श्वेतवाहनोऽसि, राजाऽसि, राजराजोऽसि, औषधीगर्भोऽसि, वन्द्योऽसि, पूज्योऽसि, नमस्ते भगवन् !

अस्य कुलस्य ऋद्धिं कुरु, वृद्धिं कुरु, तुष्टिं कुरु, पुष्टिं कुरु, जयं कुरु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विजयं कुरु, भद्रं कुरु, प्रमोदं कुरु, श्री शशाङ्काय नमः अर्हं ॐ ॥ (११-२)

**यथा वेदमन्त्रः-** **( क्षीराशनमन्त्रः )**

ॐ अर्हं जीवोऽसि, आत्माऽसि, पुरुषोऽसि, शब्दज्ञोऽसि, रूपज्ञोऽसि, रसज्ञोऽसि, गन्धज्ञोऽसि, स्पर्शज्ञोऽसि, सदाहारोऽसि, कृताहारोऽसि, अभ्यस्ताहारोऽसि, कावलिकाहारोऽसि, लोमाहारोऽसि, औदारिकशरीरोऽसि, अनेनाहारेण तवाङ्गं वर्धतां, बलं वर्द्धतां, तेजो वर्द्धतां, पाटवं वर्द्धतां, सौष्ठवं वर्द्धतां, पूर्णायुर्भव, अर्हं ॐ ॥ (१२-१)

**( षष्ठीसंस्कारमन्त्रः )**

ॐ अर्हं जीवोऽसि, अनादिरसि, अनादिकर्मभागसि, यत्त्वया पूर्वं प्रकृतिस्थितिरसप्रदेशैराश्रववृत्त्या कर्म बद्धं तद्बन्धोदयोदीरणासत्ताभिः प्रतिभुङ्क्ष्व, मा शुभकर्मोदयफलभुक्तेरुच्छेकं दध्याः, न चाशुभकर्मफलभुक्त्या विषादमाचरेः, तवास्तु संवरवृत्त्या कर्मनिर्जरा अर्हं ॐ ॥ (१३-२)

**( अन्नप्राशनसंस्कारमन्त्रः )**

ॐ अर्हं भगवान्नर्हन् त्रिलोकनाथस्त्रिलोकपूजितः सुधाधाराधारित-शरीरोऽपि कावलिकाहारमाहारितवान् पश्यन्नपि पारणाविधाविक्षुरसपरमान्न-भोजनात्परमानन्ददायकं बलम् । तद्देहिनौदारिकशरीरमाप्तस्त्वमप्याहारय आहारं तत्ते दीर्घमायुरारोग्यमस्तु अर्हं ॐ॥ (१६-२)

**( कर्णवेधसंस्कारमन्त्रः )**

ॐ अर्हं श्रुतेनाङ्गैरुपाङ्गैः कालिकैरुत्कालिकैः पूर्वगतैश्चूलिकाभिः परिकर्मभिः सूत्रैः पूर्वानुयोगैः छन्दोभिर्लक्षणैर्निरुक्तैर्धर्मशास्त्रैर्विद्धकर्णौ भूयात् अर्हं ॐ ॥

**शूद्रादेस्तु-**

ॐ अर्हं तव श्रुतिद्वयं हृदयं धर्माविद्धमस्तु ॥ (१७-२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( चूडाकरणमन्त्रः )

ॐ अर्हं ध्रुवमायुर्ध्रुवमारोग्यं ध्रुवाः श्रियो ध्रुवं कुलं ध्रुवं यशो ध्रुवं तेजो ध्रुवं कर्म ध्रुवा च कुलसन्ततिरस्तु अर्हं ॐ ॥ (१८-१)

( १ )

**उपनयनारंभवेदमन्त्रो यथा –**

ॐ अर्हं अर्हद्भ्यो नमः, दर्शनाय नमः, चारित्राय नमः, संयमाय नमः, सत्याय नमः, शौचाय नमः, ब्रह्मचर्याय नमः, आकिञ्चन्याय नमः, तपसे नमः, शमाय नमः, मार्दवाय नमः, आर्जवाय नमः, मुक्तये नमः, धर्माय नमः, सङ्घाय नमः, सैद्धांतिकेभ्यो नमः, धर्मोपदेशकेभ्यो नमः, वादिलब्धिभ्यो नमः, अष्टाङ्गनिमित्तज्ञेभ्यो नमः, तपस्विभ्यो नमः, विद्याधरेभ्यो नमः, इह-लोकसिद्धेभ्यो नमः, कविभ्यो नमः, लब्धिमद्भ्यो नमः, ब्रह्मचारिभ्यो नमः, निष्परिग्रहेभ्यो नमः, दयालुभ्यो नमः, सत्यवादिभ्यो नमः, निःस्पृहेभ्यो नमः, एतेभ्यो नमस्कृत्यायं प्राणी प्राप्तमनुष्यजन्मा प्रविशति वर्णक्रमं अर्हं ॐ ॥ (२१-१)

( २ )

ॐ नमो भगवते, चन्द्रप्रभजिनेन्द्राय, शशाङ्कहारगोक्षीरधवलाय, अनन्तगुणाय, निर्मलगुणाय, भव्यजनप्रबोधाय, अष्टकर्ममूलप्रकृतिसंशोधनाय, केवलालोकविलोकितसकललोकाय, जन्मजरामरणविनाशकाय, सुमङ्गलाय, कृतमङ्गलाय, प्रसीद भगवन् इह चन्दननामामृताश्रवणं कुरु कुरु स्वाहा ॥ (२१-२)

( ३ )

ॐ अर्हं आत्मन् देहिन् ज्ञानावरणेन बद्धोऽसि, दर्शनावरणेन बद्धोऽसि, वेदनीयेन बद्धोऽसि, मोहनीयेन बद्धोऽसि, आयुषा बद्धोऽसि नाम्ना बद्धोऽसि, गोत्रेण बद्धोऽसि, अन्तरायेण बद्धोऽसि, कर्माष्टकप्रकृतिस्थितिरसप्रदेशैर्बद्धोऽसि, तन्मोचयति त्वां भगवतोऽर्हतः प्रवचनचेतना, तद् बुध्यस्व, मा मुहः, मुच्यतां तव कर्मबन्धमनेन मेखलाबन्धेन अर्हं ॐ ॥ (२१-३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४)

ॐ अर्हं आत्मन् देहिन् मतिज्ञानावरणेन, श्रुतज्ञानावरणेन, अवधिज्ञानावरणेन, मनःपर्यायज्ञानावरणेन, केवलज्ञानावरणेन, इन्द्रियावरणेन, चित्तावरणेन आवृतोऽसि तन्मुच्यतां तवावरणमनेनाचरणेन अर्हं ॐ ॥
(२२-१)

(५)

ॐ अर्हं नवब्रह्मगुप्तीः स्वकरणकारणानुमतीर्धारयेस्तदन्तरमक्षय्यमस्तु ते व्रतं स्वपरतरणतारणसमर्थो भव अर्हं ॐ ॥ (२२-२)

(६)

ॐ अर्हं ब्रह्मचार्यसि, ब्रह्मचारिवेषोऽसि, अवधिब्रह्मचर्योऽसि, धृतब्रह्मचर्योऽसि, धृताजिनदण्डोऽसि, बुद्धोऽसि, प्रबुद्धोऽसि, धृतसम्यक्त्वोऽसि, दृढसम्यक्त्वोऽसि, पुमानसि, सर्वपूज्योऽसि, तदवधि ब्रह्मव्रतं आगुरुनिर्देशं धारयेः अर्हं ॐ ॥ (२३-२)

(७)

ॐ अर्हं गौरियं, धेनुरियं, प्रशस्यपशुरियं, सर्वोत्तमक्षीरदधिघृतेयं, पवित्रगोमयमूत्रेयं, सुधास्राविणीयं, रसोद्भाविनीयं, पूज्येयं, हृद्येयं, अभिवाद्येयं, तद्दत्तेयं त्वया धेनुः, कृतपुण्यो भव, प्राप्तपुण्यो भव, अक्षय्यं दानमस्तु अर्हं ॐ ॥ (२७-२)

(८)

ॐ अर्हं एकमस्ति, दशकमस्ति, शतमस्ति, सहस्रमस्ति, अयुतमस्ति, लक्षमस्ति, प्रयुतमस्ति, कोट्यस्ति, कोटिदशकमस्ति, कोटिशतमस्ति, कोटिसहस्रमस्ति, कोट्ययुतमस्ति, कोटिलक्षमस्ति, कोटिप्रयुतमस्ति, कोटाकोटिरस्ति, सङ्ख्येयमस्ति, असङ्ख्येयमस्ति, अनन्तमस्ति, अनन्तानन्तमस्ति, दानफलमस्ति तदक्षय्यं दानमस्तु ते अर्हं ॐ ॥ (२७-२)

(९)

ॐ वं वरुणोऽसि, वारुणमसि, गाङ्गमसि, यामुनमसि, गौदावरमसि,

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

नार्मदमसि, पौष्करमसि, सारस्वतमसि, शातद्रवमसि, वैपाशमसि, सैन्धवमसि, चान्द्रभागमसि, वैतस्तमसि, ऐरावतमसि, कावेरमसि, कारतोयमसि, गौतममसि, शैतमसि, शैतोदमसि, रौहितमसि, रौहितांशमसि, सारयवमसि, हारिकान्तमसि, हारिसलिलमसि, नारीकान्तमसि, नारकान्तमसि, रौप्यकूलमसि, सौवर्णकूलमसि, सलिलमसि, रात्कवतमसि, नैम्नगसलिलपाद्ममसि, औन्निम्नग्नमसि, पाद्ममसि, माहापद्ममसि, तैंगिच्छमसि, कैशरमसि, पौण्डरीकमसि, ह्रादमसि, नादेयमसि, कौपमसि, सारसमसि, कौण्डमसि, नैर्झरमसि, वापेयमसि, तैर्थमसि, अमृतमसि, जीवनमसि, पवित्रमसि, पावनमसि, तदमुं पवित्रय कुलाचाररहितमपि देहिनं ॥ (२९-१)

( १० )

ॐ पवित्रोऽसि प्राचीनोऽसि, नवीनोऽसि, सुगमोऽसि, अजोऽसि, शुद्धजन्माऽसि, तदमुं देहिनं धृतव्रतमव्रतं वा पावय, पुनीहि अब्राह्मणमपि ब्राह्मणं कुरु ॥ (२९-२)

( ११ )

ॐ सधर्मोऽसि, अधर्मोऽसि, कुलीनोऽसि, अकुलीनोऽसि, सब्रह्मचर्योऽसि, अब्रह्मचर्योऽसि, सुमना असि, दुर्मना असि, श्रद्धालुरसि, अश्रद्धालुरसि, आस्तिकोऽसि, नास्तिकोऽसि, आर्हतोऽसि, सौगतोऽसि, नैयायिकोऽसि, वैशेषिकोऽसि, साङ्ख्योऽसि, चार्वाकोऽसि, सलिङ्गोऽसि, अलिङ्गोऽसि, तत्त्वज्ञोऽसि, अतत्वज्ञोऽसि, तद्भवब्राह्मणोऽमुनोपवीतेन भवन्तु ते सर्वार्थसिद्धयः ॥ (२९-२)

( १२ )

ॐ ध्रुवोऽसि, स्थिरोऽसि, तदेकमुपवीतं धारय ॥ (३०/१)

**( विवाहमन्त्राः )**

( १ )

ॐ अर्हं सर्वगुणाय, सर्वविद्याय, सर्वसुखाय, सर्वपूजिताय, सर्वशोभनाय सुवस्त्रगन्धमाल्यालङ्कृतां कन्यां ददामि, प्रतिगृह्णीष्व भद्रं भवते अर्हं ॐ ॥ (३२ १)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( २ )

ॐ अर्हं परमसौभाग्याय, परमसुखाय, परमभोगाय, परमधर्माय, परमयशसे, परमसन्तानाय भोगोपभोगान्तरायव्यवच्छेदय, इमाममुकनाम्नीं कन्याममुकगोत्राममुकनाम्ने वराय अमुकगोत्राय ददाति, प्रतिगृहाण अर्हं ॐ ॥
(३३-१)

( ३ )
**( ग्रहशान्तिमन्त्रः )**

ॐ अर्हं आदिमोऽर्हन्, आदिमो नृपः, आदिमो नियन्ता, आदिमो गुरुः, आदिमः स्रष्टा, आदिमः कर्ता, आदिमो भर्त्ता, आदिमो जयी, आदिमो नयी, आदिमः शिल्पी, आदिमो विद्वान्, आदिमो जल्पकः, आदिमः शास्ता, आदिमो रौद्रः, आदिमः सौम्यः, आदिमः काम्यः, आदिमः शरण्यः, आदिमो दाता, आदिमो वन्द्यः, आदिमः स्तुत्यः, आदिमो ज्ञेयः, आदिमो दाता, आदिमो वन्द्यः, आदिमः स्तुत्यः, आदिमो ज्ञेयः, आदिमो ध्येयः, आदिमो भोक्ता, आदिमः सोढा, आदिम एकः, आदिमोऽनेकः, आदिमः स्थूलः, आदिमः कर्मवान्, आदिमोऽकर्मा, आदिमो धर्मवित्, आदिमोऽनुष्ठेयः, आदिमोऽनुष्ठाता, आदिमः सहजः, आदिमो दशावान्, आदिमः सकलत्रः, आदिमो विकलत्रः, आदिमो विवोढा, आदिमः ख्यापकः, आदिमो ज्ञापकः, आदिमो विदुरः, आदिमः कुशलः, आदिमो वैज्ञानिकः, आदिमः सेव्यः, आदिमो गम्यः, आदिमो विमृश्यः, आदिमो विमृष्टा, सुरासुरनरोरगप्रणतः, प्राप्तविमलकेवलो, यो गीयते यत्यवतंसः, सकलप्राणिगणहितो, दयालुरपरापेक्षः, परमात्मा, परं ज्योतिः, परं ब्रह्म, परमैश्वर्यभाक्, परंपरः, परात्परोऽपरंपरः, जगदुत्तमः, सर्वगः, सर्ववित्, सर्वजित्, सर्वीयः, सर्वप्रशस्यः, सर्ववन्द्यः, सर्वपूज्यः, सर्वात्मा असंसारः, अव्ययः, अवार्यवीर्यः, श्रीसंश्रयः, श्रेयःसंश्रयः, विवश्यायद्धृत्, संशयहृत्, विश्वसारो, निरञ्जनो, निर्ममो निष्कलङ्को, निष्पाप्मा, निष्पुण्यः, निर्मनाः निर्वचाः, निर्देहो, निःसंशयो, निराधारो, निरवधिः, प्रमाणं, प्रमेयं, प्रमाता, जीवाजीवाश्रवबन्धसंवरनिर्जरामोक्षप्रकाशकः, स एव भगवान् शान्तिं करोतु, तुष्टिं करोतु, पुष्टिं करोतु, ऋद्धिं करोतु, वृद्धिं करोतु, सुखं करोतु, श्रियं करोतु, लक्ष्मीं करोतु अर्हं ॐ ॥ (३४-२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( ४ )

ॐ अर्हं आत्मासि, जीवोऽसि, समकालोऽसि, समचित्तोऽसि, समकर्मासि, समाश्रयोऽसि, समदेहोऽसि, समक्रियोऽसि, समस्नेहोऽसि, समचेष्टितोऽसि, समाभिलाषोऽसि, समेच्छोऽसि, समप्रमोदोऽसि, समविषादोऽसि, समावस्थोऽसि, समनिमित्तोऽसि, समवचा असि, समक्षुत्तृष्णोऽसि, समगमोऽसि, समागमोऽसि, समविहारोऽसि, समविषयोऽसि, समशब्दोऽसि, समरूपोऽसि, समरसोऽसि, समगन्धोऽसि, समस्पर्शोऽसि, समेन्द्रियोऽसि, समाश्रवोऽसि, समबन्धोऽसि, समसंवरोऽसि, समनिर्जरोऽसि, सममोक्षोऽसि, तदेह्येकत्वमिदानीं अर्हं ॐ ॥ (३६-१)

( ५ )

ॐ रं रं रीं रौं रः नमोऽग्नये, नमो बृहद्भानवे, नमोऽनन्ततेजसे, नमोऽनन्तवीर्याय, नमोऽनन्तगुणाय, नमो हिरण्यरेतसे, नमः छागवाहनाय, नमो हव्याशनाय, अत्र कुण्डे आगच्छ २, अवतर २, उत्तिष्ठ २, स्वाहा ॥ (३६-२)

( ६ )

ॐ अर्हं ॐ अग्ने प्रसन्नः सावधानो भव, तवायमवसरः, तदाकारयेन्द्रं यमं नैर्ऋतिं वरुणं वायुं कुबेरमीशानं नागान् ब्रह्माणं लोकपालान्, ग्रहांश्च सूर्यशशिकुजसौम्यबृहस्पतिकविशनिराहुकेतूनसुरांश्चासुरनागसुवर्णविद्युदग्निद्वीपो-दधिदिक्कुमारान् भवनपतीन् पिशाचभूतयक्षराक्षसकिन्नरकिंपुरुषमहोरगगन्धर्वान् व्यन्तरान् चन्द्रार्कग्रहनक्षत्रतारकान् ज्योतिष्कान् सौधर्मेशानश्रीवत्साखंडल-पद्मोत्तरब्रह्मोत्तरसनत्कुमारमाहेन्द्रब्रह्मलान्तकशुक्रसहस्रारानतप्राणतारणाच्युत-ग्रैवेयकानुत्तरभवान् वैमानिकान् इन्द्रसामानिकान् पार्षद्यत्रायस्त्रिंशल्लोकपालानीक-प्रकीर्णकलोकान्ति-काभियोगिकभेदभिन्नांश्चतुर्णिकायानपि सभार्यान् साधुधवल-वाहनान् स्वस्वोपलक्षितचिह्नान्, अप्सरसश्च परिगृहीतापरिगृहीताभेदभिन्ना ससखीकाः सदासीकाः साभरणा रुचकवासिनीर्दिक्कुमारिकाश्च सर्वाः, समुद्रनदीगिर्याकरवन-देवतास्तदेतान् सर्वांश्च, इदं अर्घ्यं पाद्यमाचमनीयं बलिं चरुं हुतं न्यस्तं ग्राहय २, स्वयं गृहाण २ स्वाहा अर्हं ॐ ॥ (३६-२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( ७ )

ॐ अर्हं अनादिविश्वमनादिरात्मा, अनादिः कालोऽनादि कर्म, अनादिः संबन्धो देहिनां देहानुगताननुगतानां, क्रोधाहङ्कारच्छद्मलोभैः संज्वलनप्रत्याख्याना वरणानन्तानुबन्धिभिः शब्दरूपरसगन्धस्पर्शैरिच्छानिच्छापरिसङ्कलितैः संबन्धोऽनुबन्धः प्रतिबन्धः संयोगः सुगमः सुकृतः सुनिवृत्तः सुतुष्टः सुपुष्टः सुप्राप्तः सुलब्धो द्रव्यभावविशेषेण अर्हं ॐ ॥ (३७-२)

( ८ )

ॐ अर्हं कर्मास्ति, मोहनीयमस्ति, दीर्घस्थितिरस्ति, निबिडमस्ति, दुश्छेद्यमस्ति, अष्टाविंशतिप्रकृतिरस्ति, क्रोधोऽस्ति, मानोऽस्ति, मायास्ति, लोभोऽस्ति, संज्वलनोऽस्ति, प्रत्याख्यानावरणोऽस्ति, अप्रत्याख्यानावरणोऽस्ति, अनन्तानुबन्ध्यस्ति, चतुश्चतुर्विधोऽस्ति, हास्यमस्ति, रतिरस्ति, अरतिरस्ति, भयमस्ति, जुगुप्सास्ति, शोकोऽस्ति, पुंवेदोऽस्ति, स्त्रीवेदोऽस्ति, नपुंसकवेदोऽस्ति, मिथ्यात्वमस्ति, मिश्रमस्ति, सम्यक्त्वमस्ति, सप्ततिकोटाकोटिसागरस्थितिरस्ति, अर्हं ॐ ॥ (३८-१)

( ९ )

ॐ अर्हं कर्मास्तिं, वेदनीयमस्ति, सातमस्ति, असातमस्ति, सुवेद्यं सातं दुर्वेद्यमसातं, सुवर्णणाश्रवणं सातं दुर्वर्णणाश्रवणमसातं, शुभपुद्गलदर्शनं सातं दुष्पुद्गलदर्शनमसातं, शुभषड्रसास्वादनं सातं अशुभषड्रसास्वादनमसातं, शुभ-गन्धाघ्राणं सातं अशुभगन्धाघ्राणमसातं, शुभपुद्गलस्पर्शः सातं अशुभपुद्गलस्पर्शोऽसातं, सर्वं सुखकृत्सातं सर्वं दुःखकृदसातं, अर्हं ॐ ॥ (३८-२)

( १० )

ॐ अर्हं सहजोऽस्ति, स्वभावोऽस्ति, संबन्धोऽस्ति, प्रतिबद्धोऽस्ति, मोहनीयमस्ति, वेदनीयमस्ति, नामास्ति, गोत्रमस्ति, आयुरस्ति, हेतुरस्ति, आश्रवबद्धमस्ति, क्रियाबद्धमस्ति, कायबद्धमस्ति, तदस्ति सांसारिकः संबन्धः अर्हं ॐ ॥ (३८-२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( ११ )

ॐ अर्हं जीव त्वं कर्मणा बद्धः, ज्ञानावरणेन बद्धः, दर्शनावरणेन बद्धः, वेदनीयेन बद्धः, मोहनीयेन बद्धः, आयुषा बद्धो, नाम्ना बद्धो, गोत्रेण बद्धः, अन्तरायेण बद्धः, प्रकृत्या बद्धः, स्थित्या बद्धः, रसेन बद्धः, प्रदेशेन बद्धः, तदस्तु ते मोक्षो गुणस्थानारोहक्रमेण अर्हं ॐ ॥ (३९-२)

( १२ )

ॐ अर्हं कामोऽसि, अभिलाषोऽसि, चित्तजन्मासि, सङ्कल्पजन्मासि, काम्योऽसि, सेव्योऽसि, प्रियोऽसि, मान्योऽसि, शब्दोऽसि, रूपोऽसि, रसोऽसि, गन्धोऽसि, स्पर्शोऽसि, सर्वगोऽसि, सर्वव्यापकोऽसि, सर्वार्थोऽसि, आनन्ददोऽसि, ऊह्योऽसि, मदनोऽसि, मथनोऽसि, उन्मादनोऽसि, मोहनोऽसि, तापनोऽसि, शोषणोऽसि, मारणोऽसि, विकृतिरसि, अजेयोऽसि, दुर्जयोऽसि, प्रभुरसि नमस्ते अर्हं ॐ ॥ (४१-१)

❑

Jain Education International For Private & Personal Use Only www.jainelibrary.org